# संक्षिप्तप्रश्नाः 4th Sem (G1)

• एचोऽयवायावः (६/१/७८)

१. अयादिविधायकं सूत्रम् उल्लिख्यताम्, सूत्रस्यार्थः लिख्यताम्।

→ अयादिविधायकं सूत्रम – एचोऽयवायावः इति, एचः स्थाने यथाक्रमेण अय् अव् आय्, आव् इत्येते चत्वारः आदेशाः स्युः अचि परे।

२. नै अकः, पौ अकः, पो अनः, भौ उकः, ने अनम्, शे अनम् – इत्यत्र किं सन्धिकृतं रूपं भवति? केन सूत्रेण वा सन्धिर्भवति?

→ नायकः, पावकः, गायकः, पवनः, भावुकः, नयनम्, शयनम् – इत्यत्र एचोऽयवायावः इति सूत्रेण सन्धिर्भवति।

• अदेङ्गुणः (१।१।२)

१. किं गुणसंज्ञाविधायकं सूत्रम्? सूत्रस्यार्थः लिख्यताम्।

→ अदेङ्गुणः इति गुणसंज्ञाविधायकं सूत्रम्। अकारः एकारः ओकारश्च गुणसंज्ञकाः भवन्ति।

२. के वर्णाः गुणसंज्ञकाः भवन्ति?

→ अकारः एकारः ओकारश्च गुणसंज्ञकाः भवन्ति।

• आद् गुणः (६।१।८७)

१. गुणसन्धिविधायकं सूत्रम् उल्लिख्यताम्। सूत्रस्यार्थः लिख्यताम्।

→ गुणसन्धिविधायकं सूत्रम् – आद् गुणः इति। अवर्णात् अचि परे पूर्वपरयोः एकः गुणः आदेशः भवति इत्यर्थः।

२. उप इन्द्रः, गङ्गा उदकम् – अत्र केन सूत्रेण सन्धिर्भवति? सन्धौ किं वा एतयोः रूपं भवति?

→ उप इन्द्रः, गङ्गा उदकम् – अत्र 'आद् गुणः' इति सूत्रेण सन्धिर्भवति, सन्धौ एतयोः रूपं उपेन्द्रः, गङ्गोदकम् इति भवति।

• उपदेशेऽजनुनासिक इत् (१।३।२)

१. कः उपदेशः?

→ उपदेशः आद्योच्चारणम्। तत्र एका कारिका विद्यते –

प्रत्ययाः शिवसूत्राणि आदेशा आगमास्तथा।
धातुपाठो गणपाठ उपदेशाः प्रकीर्तिताः॥ इति।

२. उपदेशो अनुनासिकस्वराणां केन सूत्रेण इत्संज्ञा विहिता ?
→ उपदेशो अनुनासिकस्वराणां येन सूत्रेण इत्संज्ञा विहिता तत् हि— 'उपदेशोऽजनुनासिक इत्' इति।

• उरण् रपरः (१।१।५१)

१. र- प्रत्याहारः कथं साध्यते ?
→ लण्- सूत्रे लकारस्य अकारम् इतं गृहीत्वा रकारादिः (र्- शब्दः) अन्त्येन अकारेण इता र- प्रत्याहारं जनयति।

२. सन्धौ ऋवर्णस्य अणादेशो कः वर्णः परतः आयाति ?
→ सन्धौ ऋवर्णस्य अणादेशो रकारः परतः आयाति।

३. कृष्णर्द्धिः इत्यत्र कः सन्धिविच्छेदः ? ततः केन सूत्रेण सन्धिर्भवति
→ कृष्णर्द्धिः इत्यत्र कृष्ण ऋद्धिः इति सन्धिविच्छेदः। ततः 'उरण्- -रपरः' इति सूत्रसहायेन आद्गुणः इति सूत्रेण सन्धिर्भवति।

• लोपः शाकल्यस्य (८।३।१९)

१. 'लोपः शाकल्यस्य' इति सूत्रे शाकल्यस्य इति पदस्य किं तात्पर्यम् ?
→ 'लोपः शाकल्यस्य' इति सूत्रे शाकल्यः इति कस्यचित् ऋषेर्नाम। तस्य नामग्रहणात् सन्धौ विधेः वैकल्पिकत्वं तात्पर्यम्।

२. हरय् इह — अत्र केन सूत्रेण यकार- लोपः भवति ?
→ हरय् इह — अत्र 'लोपः शाकल्यस्य' इति सूत्रेण यकार- लोपः भवति।

३. हर इह — इति स्थिते पुनः सन्धिर्भवति न वा ? सकारणं उत्तरम् दीयताम्।
→ हर इह- इति स्थिते पुनः सन्धिः न भवति। 'आद्गुणः' इति सूत्रेण पुनः सन्धौ प्राप्ते 'लोपः शाकल्यस्य' इति सूत्रस्य असिद्धत्वात् पुनः सन्धिः न भवति।

• पूर्वत्रासिद्धम् (८।२।१)

१. पूर्वत्रासिद्धम् इति सूत्रे पूर्वत्र इति पदस्य कोऽर्थः ? किं वा असिद्धम् ?

उत्तरम् → पूर्वत्रासिद्धम् इति सूत्रे 'पूर्वत्र' इति पदस्य अर्थः — सपादसप्ताध्यायीशास्त्रम्। त्रिपादीशास्त्रम् अत्र असिद्धम्।

२. का त्रिपादी ? का वा सपादसप्ताध्यायी ?

उत्तरम् → पाणिनेः व्याकरणग्रन्थस्य नाम अष्टाध्यायी इति। अष्टानाम् अध्यायानां समाहारात् ग्रन्थस्य एतादृशं नाम। तत्र प्रत्यध्यायं चत्वारः पादाः वर्तन्ते। अष्टमाध्याये द्वितीय- तृतीय- चतुर्थपादा इति त्रयाणां पादानां समाहारः त्रिपादी इत्युच्यते। सप्तानां पादानां समाहारः सप्ताध्यायी इत्युच्यते। अष्टमाध्यायस्य प्रथमपादेन सह प्रथमानां सप्तानाम् अध्यायानां समाहारः सप्ताध्यायी सपादसप्ताध्यायी इत्युच्यते।

• वृद्धिरादैच् (१।१।१)

१. किं वृद्धिसंज्ञाविधायकं सूत्रम् ? सूत्रस्यार्थः लिख्यताम्।

उत्तरम् → वृद्धिरादैच् इति वृद्धिसंज्ञाविधायकं सूत्रम्। आकारः ऐकारः औकारश्च इति वर्णत्रयं वृद्धिसंज्ञकं भवति।

२. वृद्धिरेचि (६।१।८८)

१. किं वृद्धिसन्धिविधायकं सूत्रम् ? सूत्रस्यार्थः सोदाहरणं लिख्यताम्।

उत्तरम् → वृद्धिरेचि इति वृद्धिसन्धिविधायकं सूत्रम्। अवर्णात् एचि परे वृद्धिरेकादेशः भवति। यथा- कृष्ण एकत्वम् > कृष्णैकत्वम्, गङ्गा ओघः > गङ्गौघः।